# प्रेमाम्भोजमरन्दाख्यं स्तवराजम्

महाभावोज्ज्वलच्चिन्तारत्नोद्भावितविग्रहाम् ।

सखीप्रणयसद्गन्धवरोद्वर्तनसुप्रभाम् ॥१ ॥

कारुण्यामृतवीचिभिस्तारुण्यामृतधारया ।

लावण्यामृतवन्याभिः स्नपितां ग्लपितेन्दिराम् ॥२ ॥

ह्रीपट्टवस्त्रगुप्ताङ्गीं सौन्दर्यघुसृणाञ्चिताम् ।

श्यामलोज्ज्वलकस्तूरीविचित्रितकलेवराम् ॥३ ॥

कम्पाश्रुपुलकस्तम्भस्वेदगद्गदरक्तताः ।

उन्मादो जाड्यमित्येते रत्नैर्नवभिरुत्तमैः ॥४ ॥

वःक्षालङ्कृतिसंस्लिष्टां गुणालीपुष्पमालिनीम् ।

धीराधीरात्वसद्वासपटवासैः परिष्कृताम् ॥५ ॥

प्रच्छन्नमानधम्मिल्लां सौभाग्यतिलकोज्ज्वलाम् ।

कृष्णनामयशःश्राववतंसोल्लासिकर्णिकाम् ॥६ ॥

रागताम्बूलरक्तौष्ठीं प्रेमकौटिल्यकज्जलाम् ।

नर्मभाषितनिस्यन्दस्मितकर्पूरवासिताम् ॥७ ॥

सौरभान्तःपुरे गर्वपर्यङ्कोपरि लीलया ।

निविष्टां प्रेमवैचित्त्यविचलत्तरलाञ्चिताम् ॥८ ॥

प्रणयक्रोधसच्चोलीबन्धगुप्तीकृतस्तनाम् ।

सपत्नीवक्त्रहृच्छोषियशःश्रीकच्छपीवराम् ॥९ ॥

मध्यतात्मसखीस्कन्धलीलान्यस्तकराम्बुजाम् ।

श्यामां श्यामस्मरामोदमधुलीपरिवेशिकाम् ॥१० ॥

त्वां नत्वा याचते धृत्वा तृणं दन्तैरयं जनः ।
स्वदास्यामृतसेकेन जीवयामुं सुदुःखितम् ॥११ ॥
न मुञ्चेच्छरणायातमपि दुष्टं दयामयः ।
अतो गान्धर्विके हा हा मुञ्चैनं नैव तादृशम् ॥१२ ॥
प्रेमाम्भोजमरन्दाख्यं स्तवराजमिमं जनः ।
श्रीराधिकाकृपाहेतुं पठंस्तद्दास्यमाप्नुयात् ॥१३ ॥